वृश्चिकमिथुने चारिविधौ। यदि कन्याष्टमे भर्त्तुर्भर्त्तुः षष्ठे च कन्यका। षड़ष्टकं विजानीयात् वर्ज्जितं त्रिदशैरपि” ज्यो०त०। तत्र प्रतिप्रसवः। “सौहृद्ये तूभयोर्द्वयोरपि तयोरैकाधिपत्येऽपि वा ताराषट्सु सुमित्रमित्रसुखदक्षेमार्थसम्पद्यदि। षट्काष्टे नवपञ्चमे व्ययधने योगे च पुंयोषितोः प्रोत्यायुःसुखवृद्धिपुष्टिजननं कार्य्यो विवाहः शुभः” भुज०भी०। अत्यन्तापद्विषये व्यासः। “मैत्रादियोगेऽपि षडष्टकादौ ताराविपत्प्रत्यरिनैधनाख्याः। वर्ज्ज्या विवाहे पुरुषोडुतो हि प्रीतिः परा जन्मसु तारकासु”। तत्रदानमुक्तम् तत्रैव। “षड़ष्टके गोमिथुनं प्रदेयमिति”।

**अरिषड़्वर्ग** पु० षसां वर्गः समुदायः षड्वर्गः अरीणां कामक्रोधलोभमोहमदमात्सर्य्यरूपाणामन्तःशत्रूणां षड्वर्गः देवीभागवतवत् विष्णुभागवतवच्च सापेक्षत्वेऽपि गमकतया स०। कामादिषु षट्स्वान्तरेषु रिपुषु “कृतारिषड्वर्गजयेन” किरा०।

**अरिषण्य** त्रि० न रिषति हिनस्ति रिष हिंसायाम् अन्यक् न०त०। अहिंसके “श्वानेव नौ अरिषण्या तनूनाम्” ऋ०२,३९,४, “अरिषण्यावहिंसकौ श्वानौ” भा०।

**अरिष्ट** पु० रिष—हिंसायां कर्त्तरि—क्त न०त०। १लशुने २निम्बे। “सर्षपारिष्टपत्राभ्यां सर्पिषा लवणेन च “व्रणिरक्षायां सुश्रुतः। “सुमनायाश्च पत्राणि पटोलारिष्टयोस्तथेति” विद्रधिचिकित्सायां सुश्रुतः। ३ लङ्कानिकटवर्त्तिपर्वतभेदे ४काके ५कङ्के (रीठा) इति ख्याते ६फेनिलफलकवृक्षे। “अरिष्टकस्त्रिदोषघ्नोग्रहजिद्गर्भपातनः” वैद्य०। ७कृष्णहतेऽसुरभेदे। “यत्र शाल्वञ्च मैन्दञ्च कंसं द्विविदमेव च अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम्। नागं कुवलयापीडं चानूरं मुष्टिकं तथा। दैत्यान् मानुषदेहस्थान् सूदयामास वीर्य्यवान्” हरिवं०। ८अशुभे। ९तक्रे। १०सूतिकागृहे। “अरिष्टशय्यां परितोविसर्पिणा” रघुः तत्करणप्रकारस्तु “नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्ततिथ्यादौ तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विन्यस्तन्यग्रोधतिन्दुकभल्लातकसर्षपदूर्वानिर्म्मितं शय्यागारं यथासंख्यं तन्मयपर्य्यङ्कमुपलिप्तभित्ति सुविभक्तपरिच्छदं प्राग्द्वारं दक्षिणद्वारं वाऽष्टहस्तायतं चतुर्हस्तविस्तृतं रक्षामङ्गलसम्पन्नं विधेयम्” सुश्रु०। तत्र प्रवेशे “रोहिण्यैन्दवपौष्णे तु स्वातीवरुणयोरपि। पुनर्वसौ पुष्यहस्तधनिष्ठासूत्तरासु च। मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारमाविशेत्” नि० सि० तारा उक्ता। एतच्च सम्भवे “प्रसूति समये प्राप्ते सद्यएव प्रवेशयेत्” वशिष्ठोक्तेः। तच्च नैरृत्यां वास्तुभूमौ कार्यम् “वारुण्यां भोजनगृहं नैरृत्यां सूतिकागृहम्” वशिष्ठोक्तेः “दशाहं सूतिकागारमायुधैश्च विशेषतः। वह्निना तिन्दुकालातैः पूर्णकुम्भैः प्रदीपकैः। मुषलेन तथा द्वारि वर्णकैश्चित्रितेन च” विष्णु०पु० ११अनिष्टसूचके उत्पाते भूमिकम्पादौ “अरिष्टे त्रिविधोत्पाते” इतिज्यो० १२अनिष्टस्थानस्थेषु रव्यादिग्रहेषु। १३पानेनारिष्टकारके मद्ये। “रक्तारिष्टं शोषिताजीर्णशेषम्” माघः। “अरिष्टं लघु पाकेन सर्व्वतस्तु गुणाधिकम्। अरिष्टस्य गुणा ज्ञेया वीजद्रव्यगुणैः समाः” वैद्य०। मद्ये पुंस्त्वमपि भावप्र०। नास्ति रिष्टं यतोऽधिकम् ५ब०। १४मरणचिह्ने। “रोगिणो मरणं यस्मादवश्यं भावि लक्ष्यते। तल्लक्षणमरिष्टं स्यात् रिष्टमप्यभिधीयत” इति पुरा०। न०त०। १५शुभे न० ५ब०। १६ शुभदायके विधाने १७अविनाशिनि च त्रि०। १८ वलिपुत्रे दैत्यभेदे पु० “अरिष्टो वलिपुत्रश्च वरिष्ठोऽथ शिलायुधः” हरिवं० (कट्की) ख्यातायां १९ कटुकायां २०कश्यपपत्नीभेदे च स्त्री “अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खशा” इत्युपक्रम्य “कद्रुर्मुनिश्च राजेन्द्र! तास्वपत्यानि मे शृणु अरिष्टा तु महासत्वान् गन्धर्वानमितौजसः” हरिव० रिष्टं हिंसा विरोधे न०त०। २१सुखेनावस्थाने न० “मत्तवेऽथो अरिष्टतातये” ता०ब्रा०। “अरिष्टं सुखेनावस्थानं तस्य तातये विस्ताराय” भा०। स्वार्थे कन्। निम्बादौ।

**अरिष्टगातु** अरिष्टं हिंसितं गच्छति गम—तुन् नि० आदन्तादेशः। अहिंसितगमने। “अरिष्टगातुःसहोतासहोभरिः” ऋ० ५,४४,२, “अरिष्टगातुरहिंसितगमनः” भा०।

**अरिष्टताति** अरिष्टस्य करः वेदे अरिष्ट+तातिल्। सुखकरणे ‘जीवातवे न मृत्यवेऽथोऽरिष्टतातये’ ऋ०१०,६०,८, “ओषधीरस्मा अरिष्टतातये” यजु०। लोके तु तायक्तिन्। अरिष्टविस्तारे “तदत्रभवतां निष्पन्नाशिषमरिष्टतातिमाशास्महे” वीरच०। क्वचिद्वेदेऽपि तथा अरिष्टशब्दे दृश्यम्।

**अरिष्टदुष्टधी** त्रि० अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य। आसन्नमरणसूचक-निमित्तेन दुष्टमतौ

**अरिष्टनेमि** पु० ६त० कश्यपपुत्रे विनतायाः पुत्रभेदे “तार्क्ष्य-